# पृथ्वी स्तोत्रम् अर्थ सहित

**विष्णुरुवाच –**

यज्ञसूकरजाया त्वं जयं देहि जयावहे ।

जयेऽजये जयाधारे जयशीले जयप्रदे ॥ १॥

सर्वाधारे सर्वबीजे सर्वशक्तिसमन्विते ।

सर्वकामप्रदे देवि सर्वेष्टं देहि मे भवे ॥ २॥

सर्वशस्यालये सर्वशस्याढ्ये सर्वशस्यदे ।

सर्वशस्यहरे काले सर्वशस्यात्मिके भवे ॥ ३॥

मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रदे ।

मङ्गलार्थे मङ्गलेशे मङ्गलं देहि मे भवे ॥ ४॥

भूमे भूमिपसर्वस्वे भूमिपालपरायणे ।

भूमिपाहङ्काररूपे भूमिं देहि च भूमिदे ॥ ५॥

इदं स्तोत्रं महापुण्यं तां सम्पूज्य च यः पठेत् ।

कोटिकोटि जन्मजन्म स भवेद् भूमिपेश्वरः ॥ ६॥

भूमिदानकृतं पुण्यं लभते पठनाज्जनः ।

भूमिदानहरात्पापान्मुच्यते नात्र संशयः ॥ ७॥

भूमौ वीर्यत्यागपापाद् भूमौ दीपादिस्थापनात् ।

पापेन मुच्यते प्राज्ञः स्तोत्रस्य पाठनान्मुने ।

अश्वमेधशतं पुण्यं लभते नात्र संशयः ॥ ८॥

इति श्रीब्रह्मवैवर्तमहापुराणे प्रकृतिखण्डे विष्णुकृतं पृथ्वीस्तोत्रं सम्पूर्णम् ।

eAstroHelp